# शास्त्रान्तरेषु मीमांसान्यायानां सञ्चारस्तेषां लौकिकजीवनोपयोगिता च

**डा.मञ्जुनाथभट्टः**

सहायकप्राध्यापकः, शास्त्रनिकायः

कर्नाटकसंस्कृतविश्वविद्यालयः,बेङ्गलूरु-१८

*email: mgbhatherur@gmail.com*

## उपक्रमः

चतुर्दशविद्यास्थानेषु[1] स्वस्थानमनितरसाधारण्येन प्रकाशयन्ती मीमांसा सर्वादरणीयतया सकलशास्त्रोपकारकतया खलु विराजते। सेयं मीमांसा पूर्वोत्तरभेदेन द्विधा विभक्ता वेदार्थनिर्णयार्थे नितरां निमग्नेति न पुनर्वक्तव्यम्। तत्रान्यतररूपेण वर्तमाना पूर्वमीमांसा "अथातो धर्मजिज्ञासा[2] इत्यारभ्य अन्वाहार्ये च दर्शनात्[3]" इत्यन्तसूत्रजालैः जैमिनिमुनिमुखपद्मात् विनिस्सृता। या च द्वादशलक्षणीति व्यपदिश्यते। द्वादशस्वध्यायेषु धर्ममेव विममर्श तत्रभवान् जैमिनिः। तदेव स्पष्टीकरोति कुमारिलभट्टः निजनिर्मितश्लोकवार्त्तिकाख्ये ग्रन्थे-"धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्[4]" इति। संशयविपर्यासनिरासपूर्वकत्वेन मीमांसा वेदस्य इतिकर्तव्यता भवति। शास्त्रप्रपञ्चे मीमांसाशास्त्रस्य यद्यपि वाक्यशास्त्रमिति व्यवहारः वर्तते तथापि अस्यैव शास्त्रस्य न्यायशास्त्रमिति व्यवहारोऽपि सङ्गच्छते। अत एव जैमिनीयन्यायमाला, मीमांसान्यायप्रकाशः, न्यायरत्नमाला, न्यायसुधा इत्यादयः केचन ग्रन्थाः न्यायशब्दघटिताः सन्ति।

## न्यायशब्दव्युत्पत्तिः

नीत्युपसर्गात् इण् गतौ इति धातोः घञ्प्रत्यये निष्पन्नस्य न्यायशब्दस्य व्युत्पत्तिः बहुधा प्रदर्शिता दार्शनिकैः। 'प्रमाणैरथपरीक्षणं न्यायः', 'समस्तप्रमाणव्यापारादर्थावगतिर्न्यायः' इति

---

[1] पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ या.स्मृ. १.३.

[2] जै.सू.१.१.१.

[3] जै.सू.१२.४.४१

[4] श्लो.वा.१.१.१.११

दर्शनान्तरप्रमाणप्रमेयप्रतिपादकग्रन्थेषु न्यायपदव्युत्पत्तयः श्रुतिपथमागच्छन्ति। प्रकृते तु नीयते प्राप्यते अन्यस्मिन् समानस्थले इति न्यायः व्युत्पत्तिरित्थं परिगृह्यते। पूर्वमीमांसाशास्त्रमनेकाधिकरणशोभितं प्रत्यधिकरणं नानासूत्रघटितं च एकैकं न्यायं व्युत्पादयति। वाक्यार्थनिर्णयावसरे मीमांसाशास्त्रस्य महत् योगदानम् इत्यत्र नास्ति संशीतिः। मीमांसया व्युत्पादिताः न्यायाः न केवलं मीमांसाशास्त्रोपकारकाः अपि तु शास्त्रान्तरेऽपि सिद्धान्तस्थापने तथ्यनिर्वाहे च बहूपकारकाः सन्तीति मीमांसकानां महानादरः। अत एव विश्वावसुः प्रशशंस मीमांसां विश्वगुणादर्शे-

नैयायिका वा ननु शाब्दिका वा त्रयीशिरस्सु श्रमशालिनो वा।
वादाहवे बिभ्रति जैमिनीयन्यायोपरोधे सति मौनमुद्राम्[5]॥

इति। नात्रान्यदार्शनिकानां निन्दा विवक्षिता। किन्तु वाक्यार्थनिर्णयावसरे तत्रापि वेदवाक्यार्थनिर्णयसन्दर्भे मीमांसैव शरणीकरणीया इति तात्पर्यम्। लोके यः व्यवहारः समस्ति स एव शास्त्रेऽपि स्वीकृतो जैमिनिना। स एव शास्त्रव्यवहारः लोकोपयोगायापि भवति। न केवलं लोकव्यवहारः अपि तु लोके येषां शब्दानां प्रयोगः यस्मिन्नर्थे विद्यते वेदाविरोधे सति स एव ग्राह्यः सूत्रार्थविविरणसन्दर्भे इति बभाषे भाष्यकारः शबरमुनिश्च[6]। इत्थं च शास्त्राविरोधेन लोकः, लोकाविरोधेन शास्त्रम् एवमुभयमपि नेतव्यमिति जैमिनिमुनिमनीषा। वेदार्थनिर्णयार्थप्रवृतमीमांसान्यायाः शास्त्रान्तरे लौकिकव्यवहारे च कथमुपकुर्वन्ति? तेषां समन्वयः कथमिति? प्रतिपिपादयिषयायं लेखनव्यापारः।

**अर्थवादाधिकरणन्यायः**

पूर्वमीमांसायां प्रतिपाद्यविषयाः अधिकरणरूपेणैव चिन्तिताः। अधिकरणस्वरूपं तु एवमुक्तमभियुक्तैः-

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
प्रयोजनं सङ्गतिश्च शास्त्रेऽधिकरणं स्मृतम्॥

[5] विश्वगुणादर्शचम्पूः-श्लो.सं.५६४

[6] लोके येषु अर्थेषु प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम्, नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वा-सव्याख्यशाबरभाष्यसमेतं मीमांसादर्शनम्- अथातो धर्मजिज्ञासा-१.१.१.

इति। विषयादीनाम् एषां षण्णामवयवानां समुदायात्मकमेव अधिकरणशब्देन व्यवह्रियते। अत्र विषयत्वं नाम तत्तधिकरणघटकीभूतसंशयविशेष्यत्वम्। विशयो नाम संशयः। पूर्वपक्षस्तु सिद्धान्तप्रतिवादी भवति। अन्ते यः विषयः सिद्धो भवति स एव सिद्धान्तः इत्युच्यते। प्रयोजनं नाम फलम्। सङ्गतिर्नाम कश्चन सम्बन्धः। प्रतिपादितविषयेण सह प्रतिपाद्यविषयस्य च सम्बन्धः। इत्थं चाधिकरणान्तःकरणं शास्त्रे निगदितम्। तस्य स्वरूपविवरणव्याजेनात्र विस्तरेण अर्थवादाधिकरणं लक्ष्यते। अर्थवादो नाम स्तुतिनिन्दान्यतरपरं वाक्यम्। पूर्वमीमांसायां प्रथमाध्याये प्रथमपादे विधीनां प्रामाण्यं व्यवस्थाप्य द्वितीयपादे अर्थवादानां प्रामाण्यं सिसाधयिषया सूत्रकारः "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते[7]" इत्यनेन पूर्वपक्षसूत्रेणाधिकरणं प्रारभते। अर्थवादस्तु विधेयगतप्राशस्त्यं निषेध्यगतमप्राशस्त्यं च बोधयति। अधिकरणेऽस्मिन् सर्वाण्यर्थवादवाक्यानि उदाहरणानि भवन्ति। वेदे "वायव्यं श्वेतमालभेत भूतिकामः" इत्येकं वाक्यं श्रुतम्। इदं च वाक्यं विधिवाक्यम्, आलभेत इति विधिप्रत्ययश्रवणादिति मीमांसामर्यादा। वायुदेवतामुद्दिश्य श्वेतपश्वालम्भनरूपं कर्म विधाय तत्पश्चात् "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीति" कश्चन अर्थवादः पठितः। अयमर्थवादः वायुगतक्षिप्रगामित्वादिगुणं प्रकाशयन् विदितमेवार्थं बोधयति। विधायकत्वेनैतेषां न प्रामाण्यावसरः। अतः धर्मे अर्थवादाः न प्रमाणम् इति पूर्वः पक्षः। तत्र सिद्धान्त एवमभिधीयते यदत्र द्वयोः वाक्ययोः पूर्वं वाक्यं विधायकम्। अपरं च स्तावकम्। उभयोर्मध्ये कश्चन सम्बन्धः वर्तत एव। अत्र श्रुतमर्थवादवाक्यं वायुः क्षिप्रगामी देवता इति लोकसिद्धमेवार्थं प्रतिपादयत् मुख्यं प्रयोजनं न लभते। अत्र मुख्यं प्रयोजनं तु प्रवृत्तिराहोस्विन्निवृत्तिः। अतः मुख्यप्रयोजनविरहितानाम् अर्थवादानां किं कार्यमस्माकमित्याकाङ्क्षा। विधिस्तु प्राशस्त्यं कामयते। अर्थवादस्तु प्राशस्त्यं लक्षयति। इत्थं च उभयोरेकवाक्यता दुर्वारा। क्षिप्रगामी देवता वायुः शीघ्रफलदापनसमर्था। अतः वायुदेवताकं कर्म प्रशस्तमिति तात्पर्यम्। आलस्यादिवशात् अप्रवर्तमानपुरुषस्य प्रवृत्तिमुत्पादायितुम् अर्थवादापेक्षा। निषेध्यगतमप्राशस्त्यमपि प्रतिपादयन्नर्थवादः निवृत्तिं जनयति। इत्थं चार्थवादानां प्रामाण्यं प्रत्यपादि। अस्य अर्थवादस्य महानुपयोगोऽस्ति लोके। लोके विज्ञापनक्षेत्रे (advertisement) अर्थवादस्य महान् प्रभावः वर्तते। यत्किमपि वस्तु क्रयणयोग्यं भवेच्चेत् तस्य स्तुतिः जनहृदयहारितया कर्तव्या। उदा- fair & lovely


---

[7] जै.सू.१.२.१.

इति त्वचः सौन्दर्यवर्धकं किञ्चिद्वस्तु। केवलमस्य क्रयणं कुरुत इत्येव आपणिकेनोच्यते चेत् न कस्यापि न कस्याः अपि प्रवृत्तिः स्यात्। अतः तस्य स्तुतिः क्रियते। स्तावकश्रवणसमनन्तरमेव तद्वस्तुक्रयणे झटिति प्रवृत्तिस्स्यात्। एवमेव magi इत्याख्यभक्ष्यविशेषविषये अप्राशस्त्यबोधकत्वेन निवृत्तिजनकत्वमर्थवादप्रयोजनम्।




१. विधेयगतप्राशस्त्यबोधकत्वम् ।




२. निषेध्यगताप्राशस्त्यबोधकत्वम् ।

एवमेव अर्थवादन्यायः लोके महोपकारकः इति दिक्।

**शिष्टाकोपाधिकरणन्यायः**

द्वादशलक्षण्यां प्रथमाध्यायतृतीयपादे चतुर्थमधिकरणं शिष्टाकोपेऽविरुद्धमिति चेत्[8] इत्यनेन सूत्रेण प्रारभ्यते शिष्टाकोपाधिकरणमिति। अत्र विचारः प्रवृत्तः याश्च स्मृतयः विरुद्धश्रुतिरहिताः लोभादिकारणविरहिताश्च वेदबोधितकालक्रमादीनां बाधिकाः सन्ति तासां प्रामाण्यमस्ति वा न वेति। क्षुते आचामेत्, निष्ठीविते आचामेत् इत्येवं शुद्धिहेतोराचमनं विहितम्। क्रतुमध्ये 'वेदं कृत्वा वेदिं करोती'त्यनेन वाक्येन वेदस्य दर्भमुष्टिविशेषस्य करणोत्तरं वेदिनिर्माणं विहितम्। यदि वेदकरणानन्तरं क्षुतं स्यात् तर्हि स्मृत्युक्ताचमनापेक्षया श्रुत्युक्तवेदिकरणस्य प्राबल्यादाचमनस्य बाधः इति पूर्वपक्षस्य निराकरणमेवं कृतम्। "प्रमाणबलाबलात् प्रमेयबलाबलं ज्यायः" इति न्यायेनात्र प्रमेयबलाबलनिर्णयद्वारा सिद्धान्तः प्रतिपादितः। वेदकरणोत्तरं यद्याचमनं क्रियते तर्हि कालक्रमादीनां बाधः स्यादित्यभिप्रायेणात्र श्रुतिप्रमाणस्य प्रमेयं कालक्रमादिकम्। एतच्च पदार्थाश्रितम्। स्मृतिप्रमाणस्य प्रमेयं तु आचमनम्। तच्च पदार्थरूपेण व्यवह्रियतेऽत्र। पदार्थापेक्षया तदाश्रितस्यैव दौर्बल्यम्[9]। उभयोर्मध्ये धर्मधर्मीभावः। किञ्च वेदं कृत्वा वेदिं करोतीत्यत्र क्त्वाप्रत्ययेन पूर्वकालिकत्वं तावद्बोध्यते। अपि च आचमनं तयोर्विद्यमानस्य क्रमस्य न बाधकम्। इत्थं च स्मृत्युक्ताचमनस्यापि प्रामाण्यं व्यवस्थापितम्। अस्यैव न्यायस्य वेदान्तशास्त्रे प्रातर्दनाधिकरणे प्राणस्तथानुगमात्[10] इत्यस्मिन् सञ्चारः सम्प्रवृत्तः इत्थम्- कौषीतकिनामुपनिषदि प्रतर्दनाख्यायिकायां प्रतर्दनं प्रतीन्द्रवचनं श्रूयते 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व' इति। अत्र प्राणशब्देन किं वायुरभिधीयते उत परमात्मेति संशयशरीरे वायुरेव प्राण इति पूर्वपक्षः पूर्वतन्त्रन्यायेनानेन निराक्रियते। उपक्रमोपसंहारन्यायोऽपि पूर्वमीमांसाशास्त्रप्रादुर्भूत एव। अत्राधिकरणे "त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे" इत्युपक्रम्य "प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृतः" इत्युपसंहारे ब्रह्मणः प्रतिपादनात् ब्रह्मवाक्यं प्रबलप्रमेयाश्रितं सत् दुर्बलप्रमेयाश्रितवायुविषयश्रुत्यादिभ्यः बलवत्।

---

[8] जै.सू.१.३.५.

[9] अत एव श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलाश्रितत्वेन प्राबल्यात्पदार्थगुणभूतश्रौतक्रमत्यागेन वेदकरणानन्तरं क्षुते आचमनमेव कार्यमित्युक्तम्-मीमांसान्यायप्रकाशः पृ. १११.

[10] ब्र.सू.१.१.२८

शिष्टाकोपन्यायेनैव ब्रह्मपरत्वं प्राणशब्दस्य सिद्धान्तितम् वेदान्ते। न्यायस्यास्य लोकोपयोगितां सिसाधयिषया जग्रन्थ कुमारिलभट्टः-

अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः।
दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः॥ [11]

इति। एवं च लोकोपयोगिता सिद्ध्यत्यस्य न्यायस्य।

**सामर्थ्याधिकरणन्यायः**

प्रथमाध्यायस्य चतुर्थपादे अन्तिममधिकरणं सामार्थ्याधिकरणम्। यज्ञकर्मणि अवदानयोग्यानि कानिचन द्रव्याणि भवन्ति क्षीरदधिपुरोडाशमांसादीनि। एवं द्रवसंहतकठिनरूपेण द्रव्याण्याम्नातानि। एतेषां द्रव्याणां क्रतुष्वदानं कर्तव्यं चेत् अवदानसाधनान्यपेक्षितानि भवन्ति। श्रुतौ तावत् साधनान्येवं विधीयन्ते यत् स्रुवेणावद्यति, हस्तेनावद्यति तथा स्वधितिनावद्यतीति । कस्य द्रव्यस्यावदानं केन साधनेन कर्तव्यम् इति नात्र स्पष्टम्। एतन्निर्णायकवाक्यशेषाभावात् साधनानामेतेषामव्यवस्था इति पूर्वपक्षाभिप्रायं निराकृत्य “आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति” न्यायानुसारेणात्र अवद्यतीतिपदार्थगतसामर्थ्यानुसारेणैव व्यवस्था साधिता स्रुवेण द्रवद्रव्यावदानम्, हस्तेन पुरोडाशावदानम् तथा स्वधितिना मांसावदानमिति।

अत्राधिकरणे अनन्यथासिद्धेन लिङ्गेन अन्यथासिद्धश्रुतेः बाधः। अस्य न्यायस्य सञ्चारः शास्त्रान्तरे वेदान्तशास्त्रे आकाशाधिकरणे प्रस्तुतः। आकाशस्तल्लिङ्गात्[12] इत्यनेन आकाशाधिकरणविचारावसरे 'अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यान्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्'[13]

---

[11] त.वा.३.३.७

[12] ब्र.सू.१.१.२२

पूर्वतन्त्रे हि “ऐन्द्या गार्हपत्यमुपतिष्ठते “ इत्यादिस्थलेषु मन्त्रलिङ्गब्राह्मणश्रुत्योः मन्त्रब्राह्मणान्यतरलक्षणया सम्भवदन्यथासिद्धिकयोर्विरोध एव श्रुत्या लिङ्गबाधोऽङ्गीकृतः। तत्राप्यन्यथासिद्धलिङ्गविरोधे अन्यथासिद्धाया श्रुतेरेव बाधः। यथा 'हस्तेनावद्यति, स्रुवेणावद्यति, स्वधितिनावद्यति इति हस्तस्रुवस्वधितीनामवदानसामान्यसाधनत्वश्रवणेऽपि हस्तादिसामर्थ्यरूपानन्यथासिद्धिविरोधेन सङ्कोचसहिष्णूनामवद्यतिश्रुतीनामेव पुरोडाशादिकठिनद्रव्याज्यादिद्रवद्रव्यमांसावदानविषयतया सङ्कोचरूपो बाधः-न्यायरक्षामणिः पृ.३५२-३५३

[13] छान्द्योग्यम्-१/९/१

इत्यत्र श्रुतेन आकाशशब्देन किं ब्रह्माभिधीयते आहोस्वित् भूताकाशमिति चिन्तायां यद्यप्याकाशशब्दः भूतविशेषे प्रसिद्धः तथापि परब्रह्मणः एव भूतानामुत्पत्तिरिति वेदान्तमर्यादया सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते इति लिङ्गाच्च आकाशशब्देन परं ब्रह्मैवाभिधीयते इति राद्धान्तितः पूर्वमीमांसागतसामर्थ्याधिकरणन्यायेन। लोकेऽपि भोजनादिषु अर्थगतसामर्थ्यद्वारा एव कस्याहारविशेषस्य कीदृशी दर्वी भवितुमर्हतीति निर्णीयते। इण्डरी (इड्ली) चेत् चमसः, सूत्रिकाखाद्यं (noodles) चेत् विशाखः (fork) उपयुज्यते।



३.भोजनोपयुक्तानि साधनानि ।

**संयोगपृथक्त्वन्यायः**

जैमिनीये चतुर्थाध्याये तृतीयपादे तृतीयाधिकरणं संयोगपृथक्त्वाधिकरणम् 'एकस्य तूभयत्वे संयोगपृथक्त्वम्[14]' इति प्रारभ्यते। पशुयागे यूपञ्छिनत्तीत्युपक्रम्य श्रूयते वाक्यद्वयम् –खादिरो यूपो भवति तथा खादिरं वीर्यकामस्य यूपं कुर्यात् इति। यूपः पशुनियोजनार्थं क्रतुषूपयुज्यते। अत्र खादिरत्वस्य विधानं प्रथमवाक्योक्तप्रकारेण यूपाङ्गत्वेन विधीयते वा द्वितीयवाक्यानुसारेण फलायापि विधीयते वेति चिन्तायां खादिरत्वस्य केवलपुरुषार्थत्वं निराकृत्य पुरुषार्थं क्रत्वर्थं चेत्युभयार्थत्वं प्रतिपादितम्। अत्र खादिरो यूपो भवतीति वाक्यस्य प्रकरणबलात् क्रतूपकारकत्वं सिद्धम्। यूपार्थं कस्य वृक्षस्य छेदनं विहितमिति पर्यनुयोगं समाधत्ते खादिरो यूपः इति वाक्यम्। अतः खादिरत्वस्य उभयत्वे

[14] जै.सू.४.३.५.

विधानमिति राद्धान्तः। एवमेव अग्निहोत्रप्रकरणे श्रुतस्य दध्ना जुहोति तथा दध्नेन्द्रियकामस्य जुहुयात् इत्युभयत्र श्रुतस्य दध्नः क्रत्वर्थं पुरुषार्थं चेत्युभयार्थत्वम्। अयमेव संयोगपृथक्त्वन्यायः इत्युच्यते। न्यायस्यास्य योगशास्त्रे 'समाधिसिद्धिरीश्वरप्रणिधानात्[15]' इत्याख्यसूत्रविवरणसन्दर्भे वाचस्पतिमिश्रकृतटीकायां महानुपकारः साधितः[16]।

मम लेखनव्यापारस्यास्य विश्वसंस्कृतसम्मेलनप्रयुक्तभाषणार्थं तथा संशोधनपत्रिकासु प्रबन्धरूपेण प्रकाशनार्थं चेत्युभयार्थत्वमपि लेखनस्य संयोगपृथक्त्वन्यायेन सिद्ध्यतीति लोकोपयोगितास्य न्यायस्य।

**विश्वजिन्न्यायः**

जैमिनीये चतुर्थाध्याये तृतीयपादे सप्तममधिकरणं विश्वजिदधिकरणमिति। विश्वजिता यजेतेत्यत्र श्रूयमाणः विधिप्रत्ययः कर्मणः कर्तव्यत्वमात्रं बोधयति। एवं सति फलं विना कस्यचिदपि यागे प्रवृत्तिः न स्यात्। यागस्यास्य फलं प्रवृत्तिश्च आर्थीभावनापरपर्याया। विश्वजितः पुरुषार्थत्वाधिकरणे विश्वजिता यजेत इत्यत्र अध्याहृतफलपदसत्वात् इदं च कर्म पुरुषार्थमिति निर्णीय विश्वजिदधिकरणे यत्किमपि फलं कल्पनीयं चेत् तत्किमिति जिज्ञासायां सर्वसाधारण्याभिलषितं यच्च सुखं तदेव कल्पनीयमिति स्वर्गः एव फलं कल्पितं 'सः स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वात्[17]' इत्यनेन सूत्रेण। अयं च विश्वजिन्न्यायः सर्वत्र प्रसिद्ध्यधिकरणे लब्धावसरः सन् फलदः सञ्जातः वेदान्तिनाम्। तत्राधिकरणे इदमाम्नायते-सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः भवति स क्रतुं कुर्वीत, 'मनोमयःप्राणशरीरो भारूपः[18]'

---

[15] पा.यो.सू. २.४५.

[16] न च वाच्यं ईश्वरप्रणिधानादेव चेत्संप्रज्ञातस्य समाधेरङ्गिनः सिद्धिः कृतं सप्तभिरङ्गैरिति । ईश्वरप्रणिधानसिद्धौ दृष्टादृष्टावान्तरव्यापारेण तेषामुपयोगात् । संप्रज्ञातसिद्धौ च संयोगपृथक्त्वेन दध्न इव क्रत्वर्थता पुरूषार्थता च। न चैवमनन्तरङ्गता धारणाध्यानसमाधीनां सम्प्रज्ञातसिद्धौ। सम्प्रज्ञातसमानगोचरतयाऽङ्गान्तरेभ्योऽतद्गोचरेभ्योऽस्यान्तरङ्गत्वप्रतीतेः। ईश्वरप्रणिधानमपि हीश्वरगोचरं न सम्प्रज्ञेयगोचरमिति बहिरङ्गमिति सर्वमवदातम्। प्रजानातीति प्रज्ञापदव्युत्पत्तिर्दर्शिता- वाचस्पतिकृतटीकासंवलितव्यासभाष्यसमेतानि पातञ्जलयोगसूत्राणि पृ-११०

[17] जै.सू.४.३.१५

[18] छा. ३/१४/१,२

इति। अत्र श्रूयमाणमनोमयत्वादिधर्मैः किं शारीर आत्मा उपास्यत्वेनोपदिश्यते अथवा परं ब्रह्मेति चिन्तायां जीवस्य उपास्यत्वानुपपत्तौ परं ब्रह्मैव सर्ववेदान्तप्रसिद्धम् उपदिश्यते। किञ्च जीवोपासनस्य निष्फलत्वात् मनोमयत्वादिधर्मैः ब्रह्मैव उपास्यत्वेन उपदिश्यते विश्वजिन्न्यायेन।

गुणानां च परार्थत्वात् असम्बन्धः समत्वात् स्यात्[19] इत्यसौ न्यायः वैयाकरणैरादरेण स्वीकृतः। अत्र सूत्रे विद्यमानं गुणपदं विशेषणवाचकम्। विशेषणानां परार्थत्वात् अन्योपकारकत्वात् समानधर्मवत्वाच्च मिथः सम्बन्धाभावः इति न्यायहृदयम्। कारकेषु कर्मकरणकारकादीनां प्रधानकर्मनिष्पादकत्वात् गुणगुणिभावेनान्वयः दुर्घटः। अस्य न्यायस्य लोकोपयोगिता एवं सिद्ध्यति यत् सेवकः सेवकान्तरं न सेवते किन्तु राजानमेव इति। एवमेव व्याकरण[20]साहित्यादिशास्त्रेषु च 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्[21]' इति सूत्रसिद्धन्यायस्य सञ्चारो दृश्यते। श्रुतिलिङ्गादीनि षट् प्रमाणानि विनियोगविधेः सहकारिभूतानि । प्राबल्यदौर्बल्यविचारे प्रसक्ते श्रुतिस्तु सर्वापेक्षया बलीयसी। इतरेषां तु पूर्वप्रमाणापेक्षया दौर्बल्यम्। एवमत्राङ्गानां पारदौर्बल्यं प्रतिपादितम्। अनेकशास्त्रोपकारकत्वमस्य न्यायस्य दृष्टचरः।

**उपगात्रधिकरणम्**

जैमिनीये तृतीयाध्यायस्य सप्तमे पादे उपगात्रधिकरणमिति प्रसिद्धम्। ज्योतिष्टोमे उपगातार उपगायेयुः इति उपगातारः श्रूयन्ते। गायकगणे मुख्यगायके कस्मिंश्चित् विरम्य गायति सति तद्गणान्तर्भूताः केचन उपगातारः गानं कुर्युः। किमेते उपगातारः ऋत्विक्षु अन्तर्भवन्ति वा न वा इति संशये सति ऋत्विक्षु परस्परं गुणप्रधानभावानुपपत्तौ उपगातारः ऋत्विग्भ्यः अन्ये इति सम्प्राप्ते पूर्वपक्षे सिद्धान्त अभिधीयते यत् पूर्वसिद्धशमित्रधिकरणन्यायेन[22] 'नाध्वर्युरुपगायेत्' इति निषेधवाक्यबलादपि

---

[19] जै.सू.३.१.२२.

[20] प्रौढमनोरमायां परिभाषाप्रकरणे इको गुणवृद्धी इति पाणिनीयसूत्रव्याख्यानसन्दर्भे न्यायमिममवतारयति शब्दरत्नकारः –"लिङ्गस्य श्रुत्यपेक्षया दुर्बलत्वेन प्रथमतः श्रौताच्पदार्थादिघटितवाक्यार्थबोधे वृत्ते निर्दिष्टस्थानिकत्वेनोपस्थितस्यापीक्पदस्य वाक्यार्थेऽनन्वयात्" इति। भैरवीव्याख्यायां – दुर्बलत्वेनेति। "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् इति सूत्रे मीमांसायां हि तथोक्तम्" इत्यादि। प.९९.

[21] जै.सू.३.३.१४.

[22] पू.मी.द.३.७.१२.

उपगातारः ऋत्विक्षु एवान्तर्भूताः इति। इत्थं च ऋत्विक्षु अन्तर्भूतानामपि दक्षिणा च प्रदातव्या इति। अयं च न्यायः सङ्गीतक्षेत्रेऽपि महते प्रयोजनाय। सङ्गीतकार्यक्रमेषु (classical music concert) प्रधानगायकस्य यः शिष्यः भवति उपगायकरूपेण वर्तमानः सोऽपि गायकेष्वेव अन्तर्भवति। मध्ये मध्ये सोऽपि गानं (vocal support) करोति। उपगात्रधिकरणन्यायेन उपगायकस्यापि दक्षिणा (remuneration) प्रदातव्या इति लोकप्रयोजनमस्य न्यायस्य भवति।

लोके राजनीतिक्षेत्रे यस्य कस्यापि नायकस्य चयनं कर्तव्यं चेत् निर्वाचनं (election) भवति। तत्र बहुमतानुरोधेन नायकश्चितो भवति। एवमेव कस्मिंश्चिदपि विषये कश्चन निर्णयः स्वीकर्तव्यश्चेत् तत्र जनानां विप्रतिपत्तिश्चेत् बहुमतानुरोधेनैव निर्णयः भवति। अत्रापि 'विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वात्[23]' इति कश्चन न्यायः उपकरोति। पूर्वमीमांसायां तत्तधिकरणसिद्धाः न्यायाः उत्तरत्र पूर्वपक्षप्रतिपादनेऽपि सञ्चार्यन्ते। यथा रात्रिसत्राधिकरणे[24] विश्वजिन्न्यायस्य प्रवृत्तिः। इत्थं च मीमांसान्यायाः न केवलं मीमांसाशास्त्रे, न केवलं योगवेदान्तादिशास्त्रान्तरेषूपयुक्ताः, अपि तु लौकिकव्यवहारेऽपि मीमांसान्यायानां महानुपयोगः वर्तते इत्यलं पल्लवितेन।

## उपसंहारः

स्थालीपुलाकन्यायेनात्र केचन मीमांसान्यायाः प्रदर्शिताः सन्ति। शास्त्रसागरस्थिततत्वरत्नप्राप्तिहेतोरवश्यं शरणीकरणीया इयं मीमांसा। 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति येन विदुषा प्रोक्तं, मन्ये तेन जैमिनीयं न योजितं छन्दः भग्नं न भवेदिति। अत एवं वदामि-

कणादपाणिनी स्मृत्वा विस्मृतो जैमिनिर्मुनिः।
छन्दोभङ्गनिमित्तेन छन्दोभङ्गं न कारयेत्॥

---

[23] जै.सू.१२.२.२४

[24] पू.मी.द.४.३.८.

इति। इत्थं च शास्त्रीयलौकिकव्यवहारेषु सर्वतः सर्वदा विषयविशयलेशङ्क्लेशनाशलब्धावकाशन्यायव्युत्पादकस्य मीमांसाशास्त्रस्य अनितरसाधारण्येन प्रयोजनं विद्यते इत्युक्त्वा विरम्यते विस्तरभयात्।

## संकेताक्षरसूची

श्लो.वा.-श्लोकवार्त्तिकम्

जै.सू.-जैमिनिसूत्रम्

ब्र.सू.-ब्रह्मसूत्रम्

त.वा. –तन्त्रवार्त्तिकम्

पू.मी.द.-पूर्वमीमांसादर्शनम्

पा.यो.सू.-पातञ्जलयोगसूत्रम्

या.स्मृ.-याज्ञवल्क्यस्मृतिः

## उपयुक्तग्रन्थसूची

१].”दर्शनबिन्दुसङ्ग्रहः” (द्वितीयो भागः) कुलपति श्रीविद्यानिवासमिश्रप्ररोचनया समलङ्कृतः प्रकाशकः-डा.हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९२ ।

२].”न्यायरक्षामणिः” श्रीमदप्पय्यदीक्षितविरचितः (प्रथमाध्यायस्य प्रथमः पादः), श्रीनारायणभट्टविरचितया सुषमाख्यया व्याख्यया विभूषितः, प्रकाशकः- नन्दकुमार ब्रदर्स् आण्ड् सिस्टर्स्, लक्ष्मीपुरम्, मैसूर्, २००७ ।

३]. “पातञ्जलयोगसूत्राणि” वाचस्पतिमिश्रविरचितटीकासंवलितव्यासभाष्यसमेतानि।

काशीनाथशास्त्री आगाशे इत्येतैः संशोधितमेतत्पुस्तकम्।हरि नारायण आपटे इत्यनेन पुण्याख्यपत्तने आनन्दाश्रममुद्रणालये प्रकाशितम्। द्वितीया मुद्रणावृत्तिः, १९१९।

४].”प्रौढमनोरमा”, महामहोपाध्यायश्रीमद्भट्टोजीदिक्षित विरचिता, तत्पौत्रश्रीहरिदीक्षितकृतलघुशब्दरत्नसनाथीकृता भैरवमिश्रकृतरत्नप्रकाशिकादिभिः संयुता। वाराणसीस्थचौखम्भासंस्कृतसंस्थानेन प्रकाशिता। द्वितीया मुद्रणावृत्तिः १९९४ ।

५].”मीमांसादर्शनम्” श्रीमज्जैमिनिप्रणीतम्, प्रथमस्तर्कपादः श्रीवैद्यनाथप्रणीतप्रभाभिधव्याख्यासमेतशाबरभाष्योपेतः। प्रकाशकः- विनायक आपटे। आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम्, १९२९ ।

६].” मीमांसानयमञ्जरी” परिशिष्टसहिता, प्रणेता संपादकश्च- पण्डितश्रीपट्टाभिरामशास्त्री प्रकाशकः- डा.हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८४ ।

७].”मीमांसान्यायप्रकाशः” आपदेवकृतः, अभ्यंकरोपाह्ववासुदेवशास्त्रिविरचितया प्रभाख्यया व्याख्यया समेतः। प्राच्यविद्यासंशोधनमन्दिराधिकृतैः भाण्डारकरप्राच्यविद्यामन्दिरमुद्रणालये मुद्रयित्वा प्राकाश्यं नीतः १९३७ ।

८]. “याज्ञवल्यस्मृतिः” याज्ञवल्क्यप्रणीता विज्ञानेश्वरप्रणीतमिताक्षराव्याख्यासंवलिता (तृतीयावृत्तिः), प्रकाशकः –पाण्डुरङ्ग जावजी, मुम्बयी १९२६ ।

९].”विश्वगुणादर्शचम्पूः” श्रीमद्वेङ्कटाध्वरिविरचिता लकृष्णशास्त्रिविरचितपदार्थचन्द्रिकाटीकासहिता। बाक्रे इत्युपाह्वगङ्गाधरभट्टसूनुना महादेवशर्मणा संशोधिता। प्रकाशकः-तुकाराम जावजी, मुम्बयी, १९०६।

१०]. श्री बादरायणविरचितं ब्रह्मसूत्रम् (पारायणसंस्करणम्) शाङ्करभाष्योपेतम्। सम्पादकः-स्वर्ण लाल तुली कैलासविद्याप्रकाशनालयद्वारा प्रकाशितम्, कैलास आश्रमः, ऋषिकेशः २००१।

११]. “श्लोकवार्त्तिकम्” कुमारिलभट्टविरचितम् हिन्दीव्याख्यासहितम्, व्याख्याता-दुर्गाधर झा, कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयद्वारा प्रकाशितम्, १९७९।